Total No. of Questions : 5 Total No. of Printed Pages : 2

**Code No.: MN-01/BFSA-01**

# स्नातकपरीक्षाः- २०१५

## बि.ए. - विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम् - अलङ्कारशास्त्रम्

**भागः - २, पत्रिका - ३**

**विषयः - कुवलयानन्दः**

**दिनाङ्कः** - 1-4-2015 **गरिष्ठाङ्काः** - १००

**समयः** - 10.00 A.M. to 1.00 P.M. Max. Marks - 100

---

**I. एषां प्रश्नानाम् उत्तराणां लिखत ।** **10×2=20**

१. चन्द्रालोकस्य रचयिता कः? तत्र कति अलंकाराः सन्ति ?

२. हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते इत्यत्र साधारणधर्मः कः ?

३. शिवः शिरसा किं श्लाघते? किं च कण्ठे नियच्छति ?

४. कान्त्या स्मरवधूयन्ती इत्यत्र कयोः लोपः?

५. उपमेये उपमानस्य अभेदे ताद्रूप्ये वा कोऽलंकारः ?

६. अयं प्रमत्तमधुपः त्वन्मुखं वेत्ति पङ्कजम् इत्यत्र अलङ्कृतिः का ?

७. रूपकातिशयोक्तौ कस्योपादानं वाच्यतया न भवति ?

८. प्रदीयते पराभूतिः मित्रशात्रवयोस्त्वया 'इत्यत्र पराभूतिः' इत्यस्यार्थः कः ?

९. ''शैला इवोन्नताः सन्तः'' इत्यत्र कोऽलंकारः ?

१०. रूपकपरिणामयोः प्रधानः भेदः कः ?

**II. सलक्षणोदाहरणं विवृणुत (चतुरः)** **4×5=20**

१. विनोक्तिः

२. अनन्वयः

३. स्मरणम्

४. तुल्ययोगिता

५. उपमा

६. रूपकम्

- अनुवर्तते

**III. त्रयाणामुत्तरं लिखत ।** **3×10=30**

१. लुप्तोपमा कतिधा ? तां नामतो निर्दिश्य वाचकलुप्ता-धर्मलुप्तयोः उदाहरणं दत्त्वा विशदयत।

२. रूपकस्य लक्षणं विलिख्य तत्प्रभेदान् निर्दिश्य यथारूचि त्रयोणां लक्ष्यं दत्त्वा संगमयत।

३. उत्प्रेक्षां लक्षयित्वा त्रिविधामुत्प्रेक्षां नामतो निर्दिश्य कुवलयानन्दोक्तमुदाहरणं दत्त्वा संक्षेपेण लक्षणं संगमयत ।

४. आवृत्तिदीपक - प्रतिवस्तूपमयोः लक्षणं विलिख्य तयोः वैलक्षण्यं सोदाहरणं विशदयत।

५. सदृष्टान्तं दृष्टान्तं लक्षयत ।

**IV. पद्यत्रयं व्याख्याय तत्रत्यमलङ्कारं सलक्षणं निरूपयत ।** **3×6=18**

१. कामं नृपा सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः ।।

२. वियोगे गैडनारीणां यो गण्डतलपाण्डिमा ।
अदृश्यत स खर्जूरीमञ्जरीगर्भरेणुषु ।।

३. यश्च रामं न पश्येत्तु यं च रामो न पश्यति ।
निन्दितः स भवेल्लोके स्वात्मात्येनं विगर्हते ।।

४. अतियजेत निजां यदि देवतामुभयतश्चावते जुषतेऽप्यघम्।
क्षितिभृतैव सदैवतका वयं वनवताऽनवता किमहिद्रुहा ।।

**V. अत्र चतुर्षु कोऽलङ्कारः ? सलक्षणं विवृणुत ।** **4×3=12**

१. धूमस्नोमं तमः शङ्के कोकीविरहशुष्मणाम् ।

२. अयं प्रमत्तमधुपः स्त्वन्मुखं वेत्ति पङ्कजम् ।

३. अलं गर्वेण ते वक्त्र ! कान्त्या चन्द्रोऽपि नादृशः ।

४. धर्मोऽर्थ इव पूर्णश्रीः अर्थो धर्म इव त्वयि ।

---